Title तन्त्रोहोमविधिः

Author

Extent ८ पत्र Age सं. १९४८

Subject तन्त्र

नं-२८३

नेत्रहोमविधि

नं. १६३४


12

नं-५८६



#6023
F=8

complet



हो॰
१

ॐ श्रीगणेशाय नमः अथ होमविधिः मूले
न प्राणायाम मंगन्यासं करन्यासं च कृत्वा
यथोक्त कुंडे हस्तमात्र चतुरस्र चतुरंगुलो
च्छ्रितस्थंडिले वा संस्कार चतुष्टयं कुर्यात्
तद्यथा मूलमंत्रेण समीक्ष्य फट् इति कुशै
श्चतुर्दिक्षु प्रोक्ष्य च पुनः सं ताड्य हुमिति
मंत्रेण मुष्टिबन्धेन जलेनाभिसिंचेत् स्थंडिल
मध्ये त्रिकोण षट्कोणाष्टदलभूमन्दिरयु
तं यंत्रं विलिख्य यंत्रमध्ये ॐ ह्रीं ॐ मिति वि
लिख्य पीठपूजां कुर्यात् तद्यथा मंडूकाय
नमः कालाग्निरुद्राय नमः आधारशक्तये
नमः कूर्माय नमः पृथिव्यै नमः सुधासिं
धवे नमः श्वेतद्वीपाय नमः कल्पवृक्षाय न
मः तन्मूले मणिमंडपाय नमः तन्मध्ये हे
मपीठाय नमः चतुर्विदिक्षु धर्माय नमः ज्ञा
नाय नमः वैराग्याय नमः ऐश्वर्याय नमः
चतुर्दिक्षु च अधर्माय नमः अज्ञानाय नमः
अवैराग्याय नमः अनैश्वर्याय नमः मध्ये
अनन्ताय नमः तत्त्वपद्माय नमः आनन्द
कन्दाय नमः संविन्नालाय नमः प्रकृतिम

यपत्रेभ्योनमः विकृतिमयकेसरेभ्योन
मः पंचाशद्वर्णवीजाढ्यकर्णिकायैनमः
ततैव अर्कमंडलायनमः चन्द्रमंडलाय
नमः वह्निमंडलायनमः संसत्वायनमः
रंरजसेनमः तंतमसेनमः आत्मनेनमः
अंतरात्मनेनमः परमात्मनेनमः ज्ञाना
त्मनेनमः मायातत्वायनमः कलातत्वा
यनमः विद्यातत्वायनमः परतत्वायनमः
ततः पीठशक्तीः पूजयेत् ॐजयायैनमः
ॐविजयायैनमः ॐअजितायनमः ॐअ
पराजितायैनमः ॐनित्यायैनमः ॐविला
सिन्यैनमः ॐदोग्ध्र्यैनमः ॐअघोरायैनमः
मध्ये मंगलायैनमः ह्रींवागीशीवागीश्व
रयोर्योगपीठात्मनेनमः इतिशाक्तपीठे
वैष्णवपीठेतु ह्रींलक्ष्मीनारायणयोर्योग
पीठात्मनेनमः ॐह्रींवागीश्वरीभ्यांनमः
इतिमंत्रेणपूजयेत् वैष्णवपीठेतु ॐह्रीं
लक्ष्मीनारायणाभ्यांनमः इतिमंत्रेणपूज
येत् ततः सूर्यकान्तादरणितःश्रोत्रियागा
रतोपिवा पात्रेणपिहितेपात्रेवह्निमानी

हो॰ २ पयेत्ततः फडिति मंत्रेण वह्निपात्रमादाय
हूमिति मंत्रेण उद्घाट्य फडिति मंत्रेण क्र
व्यादांशं वह्निं नैरृत्यदिशि त्यजेत् मूलेन
अग्नेसंस्थाप्य पुनःपूर्वोक्तसंस्कारचतुष्ट
यंकुर्यात् तद्यथा मूलेनवीक्ष्य फडिति मं
त्रेण कुशैः संप्रोक्ष्य फडिति कुशैः संताड्य
हूमिति सुष्टिना सिंचेत् परमाग्निनाजाठ
राग्निनाचतस्याग्नेरैक्यं संचिंतयेत् रमिति
मंत्रेण वह्नौचैतन्यं योजयेत् ततः ओंकारे
णाभिमंत्र्य वमिति मंत्रेण धेनुमुद्रयाऽ
मृतीकृत्य फडिति मंत्रेण संरक्षेत् हूमिति
मंत्रेणाऽवगुंठ्य ओंकारेण कुंडोपरि त्रिः
भ्रामय प्राप्यागतामृतुस्नातां नीलेन्दीवर
धारिणीम् देवेन भुज्यमानां तां स्मृत्वा तद्यो
निमंडले ईश्वरेतो धिया वह्निं स्थापयेदात्म
संमुखम् ततोजातूपछयरानलः मूल
मंत्रंपठन् हूं वह्निचैतन्याय नमः इतिमं
त्रंचपठन् देवीदेवयोराचमनं दद्यात्
चित्पिंगलहनहनदहदहपचपचसर्व
ज्ञाज्ञापयस्वाहेति मंत्रेण वह्निं प्रज्वाल्य

ज्वालिनीमुद्रां प्रदर्श्य अंजलिं बध्वा उत्थाय अ
ग्निं प्रज्वलितं वन्देजातवेदं हुताशनम् सुवर्ण
वर्णममलं प्रसन्नं विश्वतोमुखम् इति मंत्रेण
उपतिष्ठेत् ॐ अस्य श्री षड्विंशतिवर्णवह्निमं
त्रस्य भृगुऋषिः गायत्रीछन्दः अग्निर्देवता
रं बीजम् हृदयं शक्तिः हवने विनियोगः ॐ वै
श्वानर जातवेद इहावह लोहिताक्ष सर्वक
र्माणि साधय स्वाहेति मूलाधारोद्भूतं संविद
ग्निं ललाटनेत्रद्वारा निर्गमय्य तं वाह्याग्नियु
क्तं पातयेत् ततः स्वदेहे न्यासं कुर्यात् भृगवे ऋ
षये नमः शिरसि गायत्रीछंदसे नमो मुखे
अग्नये देवतायै नमः हृदये रं बीजाय नमः
गुह्ये स्वाहाशक्तये नमः पादयोः तद्यथा सूं
हिरण्यायै नमः लिंगे सूं गगनायै नमः गुदे
सूं रक्तायै नमः शिरसि सूं कृष्णायै नमः मुखे
सूं सुप्रभायै नमः घ्राणे सूं वज्ररूपायै नमः
नेत्रयोः सूं अतिरक्तायै नमः सर्वांगेषु ततो
देवन्यासं कुर्यात् देवेभ्यो नमः लिंगे पितृभ्यो
नमः गुदे गंधर्वेभ्यो नमः शिरसि यक्षेभ्यो न
मः मुखे नागेभ्यो नमः घ्राणे पिशाचेभ्यो नमः

होे॰
३

3

नेत्रयोः राक्षसेभ्योनमः सर्वांगेषु अथषडंग
न्यासः सहस्रार्चिषेनमः हृदि स्वस्तिपूर्णायः
नमः शिरसि उत्तिष्ठ पुरुषायनमः शिखायै
वषट् धूम्रव्यापिनेकवचायहुं सप्तजिह्वायने
त्रत्रयायवौषट् धनुर्धरायअस्त्रायफट् अथा
ग्निरष्टमूर्तिन्यासः ॐअग्नयेजातवेदसेनमः
मूर्ध्नि ॐअग्नयेसप्तजिह्वायनमः वामांसे ॐ
अग्नयेहव्यवाहनायनमः वामपार्श्वे ॐअ
ग्नयेअश्वोदर्यायनमः वामकटौ ॐअग्नये
वैश्वानरायनमः लिंगे ॐअग्नयेकौमारते
जसेनमः दक्षिणकटौ ॐअग्नयेविश्वमुखा
यनमः दक्षपार्श्वे ॐअग्नयेदेवमुखायनमः
दक्षिणांसे ततःमण्डकादिवह्निमंडलपर्य
न्तंपीठदेवताःस्वदेहेन्यसेत् ततःअग्निपीठ
शक्तिन्यासः ॐपीतायैनमः १ ॐश्वेतायै
नमः २ ॐअरुणायैनमः ३ ॐकृष्णायैनमः
४ ॐधूम्रायैनमः ५ ॐतीव्रायैनमः ६ ॐस्फु
लिंगिन्यैनमः ७ ॐरुचिरायैनमः ८ ॐज्वा
लिन्यैनमः ९ ॐरंवह्निपीठासनायनमः १०
ततःस्वदेहे अग्निंध्यायेत् त्रिनेत्रमारक्ततनुं

सम्युक्तवस्त्रं सुवर्णसूत्रजमग्निमीडे वराम
यस्वास्तिकप्राकिस्त्रं स्तंपद्मस्थमाकल्पसमूह
युक्तम् एवंध्यात्वामानसोपचारैः पूजांकुर्या
त् ततःजलेनपरिषिच्य प्रागग्रानुदगग्रान्वा
त्रीन्दर्भान्परिस्तरेत् ततः कुंडे स्थंडिलेवा
त्रिकोणकारास्तिस्रःसमिधः पालाशसमि
धःविल्वसमिधश्चस्थापयेत् तत्रपश्चिमे ब्र
ह्मणेनमः दक्षिणे विष्णवेनमः उत्तरे रुद्रा
यनमः ततः मंडूकादिपरतत्त्वांतपीठदेवता
संपूज्य पीठशक्तीःपूजयेत् पीतायैनम इ
त्यादि तत्रस्वहृदयाद्नलमावाह्यगंधादिभिः
समभ्यर्च्य षट्सुकोणेषु मध्येचजिह्वास्तद्दे
वतायजेत् ईशानादिषु वायुत्तकोणेषु षट्
समर्चयेत् हिरण्याचनिरिक्ताऽन्तमध्येतवङ्ग
रूपिणीम् केसरेष्वगपूजास्याद्दलेष्वष्टसुमू
र्तयः मातरोष्टौदलाग्रेषु भैरवास्तस्तदग्रतः
यराघुरेत्तषाक्राचावग्राद्राघुथसंयुताः एव
मावरणैर्युक्तंसप्तभिर्पावकंयजेत् असितां
गोरुरुश्चंडक्रोधउन्मत्तसंज्ञकः कपालीभीष
णश्चापिसंहारश्चाष्टभैरवाः ततः स्ववामेकु

हो॰ ५

शान्तथालीस्थं तत्रवस्तूनि निःक्षिपेत् प्रणीता
प्रोक्षणीपात्रेआज्यस्थालीस्रुवंस्रुचम् अधो
मुखानिचैतानिहोमद्रव्यंहवनंकुशान् समि
धःपंचपालाशीरन्यदप्युपयोगियत् ततः
मूलमंत्रेणपवित्रद्वयकरणं ततःमूलेनशु
भांभसासर्ववस्तुप्रोक्षणम् ततःप्रणीता
दीनि उत्तानानिविधायप्रणीतांजलैःपूरयेत्
गंगेचयमुनेचैवैतिमंत्रेण तीर्थान्यावाह्य
अंकुशमुद्रया पुष्पादिकंनिक्षिप्य पवित्रेधृ
त्वाउत्पवनंकुर्यात् प्रणीतापात्रं उत्तरस्यां
निधाय प्रणीतातः किंचिज्जलमुद्धृत्यप्रोक्ष
णीपात्रेक्षिपेत् पवित्रेगृहीत्वा प्रोक्षणीज
लेन हवनीयद्रव्यंमूलंपठन्प्रोक्षयेत् त
तः स्वदक्षिणतःब्रह्मासनमास्तीर्य तत्र अं
कुशमुद्रया ॐमिति अत्रकर्मणि कृताकृ
तावेक्षकत्वेन त्वंब्रह्माभवेत्यावाह्य ॐन
मोब्रह्मणे इतिगंधादिभिरभ्यर्चयेत् ततः
स्रुकस्रुवौ समादाय अधोमुखौवह्नौत्रियाप्ता
प्य वामहस्तेकृत्वा दक्षिणहस्तेनकुशेन
तयोरग्रमूलमध्यानिमार्जनंकृत्वा अर्चौ

दकेन त्रिवारं संप्रोक्ष्य पुनर्वह्नौ प्रताप्य द
र्भानग्नौ प्रक्षिपेत् ततः स्रुवे ह्रां इच्छाशक्त्यै
नमः मूले ह्रीं ज्ञानशक्त्यै नमः मध्ये ह्रूं क्रिया
शक्त्यै नमः अग्रे एवं स्रुचि ततः आत्मदक्षि
णे कुशोपरि निदध्यात् ततः आज्यस्थाली
मादाय अस्त्राय फडिति प्रक्षाल्य अग्नौ त्रिः
परिताप्य वामहस्तेन संस्थाप्य दक्षिणह
स्तेन अर्घ्योदकेन त्रिः प्रोक्ष्य पुनरग्नौ प्रता
प्य आत्मसंमुखे स्थापयेत् आज्यमानीयाज्य
स्थाल्यां निक्षिप्य मूलेनाज्यं वीक्ष्य अस्त्राय
फडिति आज्यं प्रोक्ष्य अस्त्राय फडिति दर्भैर्ह
तं संताड्य हूमिति अर्घ्यजलेन अभ्युक्षेत्
इति संस्कारचतुष्टयं कृत्वा ततः कुंडादंगा
रानुहृत्य वायुकोणे संस्थाप्य नम इति मंत्रे
ण आज्यस्थालीं स्थापयेत् इदं तापनम् त
तदर्भयुगलं प्रज्वाल्य आज्ये निक्षिप्य दग्ध
शेषं नम इति मंत्रेण वह्नौ क्षिपेत् इदं प
वित्रीकरणम् पुनर्ज्वलितेन दर्भयुग्मेन
हूमिति मंत्रमुच्चरन् हुतेनीराज्य अग्नौ प्र
क्षिपेत् इत्युद्योतनम् ततः प्रज्वलित

हो॰ ५
5

कुशामुष्टिं गृहीत्वाऽस्त्राय फडिति मंत्रमुच्चर
न्नूदर्शयेत् इत्युच्चोतनम् तस्मादंगारादा
ज्यस्थालीमानीयं आत्मसंमुखे संस्थाप्य ता
नंगारानग्नौ प्रक्षिप्यांगारस्थानमार्जनं कृ
त्वा जलं स्पर्शयेत् तत उत्तानयोर्हस्तयोरंगु
ष्ठकनिष्ठिकाभ्यां पवित्रे पृथक् पृथक्
धृत्वाऽस्त्राय फडिति मंत्रमुच्चरन् आज्यु
त्खेचनमुत्पूयात् पवित्रस्थानांतरे स्थाप
येत् पुनस्तेनैव प्रकारेण तथैवष्टेनेन प
वित्रांतरं गृहीत्वा तेन पवित्रेण नमइति
मुच्चरन् आत्मनोभिमुखं छेदनं संज्ञाव्यपू
र्वस्थापितपवित्र द्वयमग्नौ प्रक्षिप्य इति
उत्पवनोत्पवने पवने पवनेन चाज्यस्य सं
स्कुर्यात् संस्कारषड्उदीरिताः ततः प्रादेश
मात्रं समग्रं थिदर्भयुगलमाज्यस्थाल्यांच्छ्त
मध्ये निक्षिप्य आज्य दक्षिणभागे शुक्लपक्ष
म् आज्यवामभागे कृष्णपक्षं विचिंत्य वा
मे इडां दक्षे पिंगलां मध्ये सुषुम्णां ध्यात्वा
होमं कुर्यात् ततः स्रुवेण नमइति मंत्रे
मुच्चरन् दक्षिणभागाद्घृतमादाय ॐ अग्न

येस्वाहा इत्यग्नेर्दक्षिणलोचनेजुहुयात्
संपातमाज्यंतत्रैवदक्षिणभागेनिक्षिपेत्
पुनर्नमइति मंत्रेणवामभागाद्घृतमादाय
सोमायनम इतिवामलोचनेजुहुयात् सं
पातमाज्यंतत्रैववामभागेक्षिपेत् पुनर्न
मइतिमंत्रेण मध्यभागात्घृतमानीय
अग्नीषोमाभ्यांस्वाहा इतिवन्हेर्ललाटनेत्रे
हुत्वा संपातमाज्यमध्यभागेक्षिपेत् गोपा
लपद्धे ललाटनेत्राहुतिंनकुर्यात् नरसिं
हविषयेकुर्यादेव पुनर्नमइतिदक्षिण
भागादाज्यमादाय अग्नयेस्विष्टिकृतेस्वाहा
इत्यग्ने वक्त्रेहुत्वासंपामाज्य तत्रैवक्षिपेत्
इत्यग्निवक्त्रोद्घाटनम् ततःस्वाशाद्वसुधार्यं
आहुतिंदत्वा हाशाद्वसुधार्याहुतिशेषंघृतं
तत्रैवस्थापयेत् ततो महाव्याहृतिशेषं
स्थापयेत् ॐभूःस्वाहा ॐभुवःस्वाहा ॐस्वः
स्वाहा ॐभूर्भुवःस्वःस्वाहा ॐवैश्वानरजा
तवेदइहावलोहिताग्नसर्वकर्माणिसाध
यस्वाहा इत्यग्निमंत्रेणाहुतित्रयंदत्वाहुत
शेषंजलपूर्णपात्रेस्थापयेत् ततःअग्नेर्ग

ज्ञो· ८

6

र्भाधानादिषोडशसंस्कारान्कुर्यात् यथागर्भा
धानं पुंसवनंसीमन्तोन्नयनं पुनः अनंतरं
जातकर्मस्यान्नामकरणं तथा उपनिष्क्रमणं
पश्चात् अन्नप्राशनमीरितम् चूडोपकरणे
भूयोमहानाम्नीमहाव्रतम् अथोपनिषदं
स्नानंगोदानोद्वाहनेस्मृतिः शुभेषुसर्वदिवा
ह्नाताक्रियास्त्वाकूरकर्मसु मरणांतास्तमुद्दि
ष्टावन्हेरागमवेदिभिः यथा अग्नेर्गर्भाधानं
कल्पयामिस्वाहा अग्नेपुंसवनंकल्पयामि
स्वाहा इत्यष्टाहुतिर्जुहुयात् अग्नेसीमंतो
न्नयननंकल्पयामिस्वाहा तत्समयेअग्ने
त्वंअमुकनामासि ततस्तंत्राधिष्ठात्रिदेवता
नाम्नानामकुर्यात् अथवा अग्नेत्वंवरदना
मासि विश्वरूपनामासिवानामकुर्यात् ततः
अमुकनामाग्नयेनिष्क्रमणंकल्पयामिस्वा
हा इत्यष्टाहुतिर्जुहुयात् एवंसंस्कारादिकं
कुर्यात् ततः तस्यपितरौ संपूज्य आत्मानि
योजये तस्यपितरौ वागीश्वरी वागीश्वरौ
यथा इदंपाद्यं वागीश्वर्यैनमः इतिपाद्यादि
भिःसंपूज्य वागीश्वर्यैनमः इतिपुष्पांजलि

त्रयंदत्वा वागीश्वर्यैनमः इतिनमस्कुर्यात्
एवंवागीश्वरंसंपूज्य वागीश्वरीसहितवागी
श्वरपूजितोसिदत्तमस्वेत्युक्त्वा संहारमुद्रया
स्थंडिलांतं वहन्ना सायुटेश्वानीयस्वहृदिस्था
पयेत् ततोग्नेर्जिह्वाागमूर्तीनांमंत्रैरेकैकाहु
तींर्जुहुयात् यथा ॐहिरण्यायेनमः इत्ये
काहुतिंर्जुहुयात् एवमग्रेपि ॐगगनायै
नमः ॐरक्तायैनमः ॐकृष्णायैनमः ॐसु
प्रभायैनमः ॐबहुरूपिण्यैनमः ॐअ
ति रक्तायैनमः सहस्रार्चिषेहृदयायस्वा
हा उत्तिष्ठपुरुषायशिखायैवौषट् धूमव्या
पिनेकवचायहुंम्स्वाहा सप्तजिह्वायनेत्र
त्रयाय वौषट् स्वाहा गोपालपक्षे सप्तजि
ह्वायनेत्राभ्यांवौषट् धनुर्धरायअस्त्रायफ
ट्स्वाहा अग्नयेजातवेदसेस्वाहा १ अग्न
येसप्तजिह्वायस्वाहा १ अग्नेकव्यवाहनाय
स्वाहा १ अग्नयेअश्वदरजायस्वाहा १ अग्नये
वैश्वानरायस्वाहा १ अग्नयेकौमारतेजसेस्वा
हा १ अग्नये विश्वमुखायस्वाहा १ अग्नये दे
वमुखायस्वाहा १ ततोवामहस्ते स्रुवंसंस्था

ह्रो॰ ८

प दक्षिणहस्तेन स्रुवमादाय नम इति स्रुवर
न् स्रुवेन चतस्र आज्याहुतीः स्रुचीं दत्वाऽधोमुखे
न स्रुवेन स्रुचं पिधाय उत्तिष्ठन् वैश्वानर जात
वेद इहावलोहितात्सर्वकर्माणि साधय स्वा
हा वौषट् इत्यग्नि मंत्रेण पूर्णाहुतिं दत्वा त
स्मेनचदशाऽऽहुतीर्जुहुयात् ॐ स्वाहा १
ॐ श्रीं स्वाहा २ ॐ श्रीं ह्रीं स्वाहा ३ श्रीं ह्रीं क्लीं
स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ॐ श्रीं ह्रीं
क्लीं ग्लौं गं स्वाहा ६ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणप
ये स्वाहा ७ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर
वरद स्वाहा ८ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये
स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद स
र्वजनं मे वशमानय स्वाहा १० इति दशाहुती
र्हुत्वा अग्नेरष्टदेवतायं त्र्यं ध्यात्वा विन्हुपीठे
देवतां ध्यात्वा वाह्याग्निना सहैक्यं विभाव्य व
न्हिरूपां तां विचिन्त्य नित्यपूजाक्रमेण सपरि
वारां तां संपूज्य नैवेद्यं दत्वा पुनराचमनीयं
दत्वा तांबूलं निवेद्य मूलेनामुकदेवतायै न
म इति पुष्पांजलित्रयेण संपूज्य नमस्कुर्या
त् ततो वन्हीष्टदेवतयोरात्मनाच सहैक्यं वि

भाव्य तस्या मुखे पंचविंशाहुतीर्जुहुयात् य
था मूलमुच्चरन् इदं स्वाहा ऽमुकदेवतायै पत्र
क्रमेणैव पंचविंशाः हुतीर्जुहुयात् इदंज्यै
कीकरणम् ततो वह्निदेवतयोरात्मनाच सहै
क्यं विभाव्य मूलेनैकादशाहुतीर्जुहुयात् इ
दं तु नाडीसंधानम् जुहुयादंगमुख्यानामा
हुतीनामनुक्रमात् एकैकामाहुतिं सम्यक्क
र्पिघादेशिकोत्तमः इष्टदेवस्याहुतीनामेकै
काहुतिं चरेत् ततस्तन्मूलमंत्रेणादशाथाज्जु
हुयाद्धुतम् ततः कल्पोक्तद्रव्येणादशांशं जु
हुयाज्जपात् होमं समाप्य कुर्वीत पूर्णाहुति
मनन्यधीः होमावशिष्टेनाज्येन पूरयित्वा स्रु
वं सुधीः पुष्पफलं नियायाग्नेस्रुवेणाह्वाय
तां पुनः उत्थितो वैवौषडंतेन मूलेन जुहुयाद्ध
सौ तद्द्रव्येणाहुतीणां च जुहुयादाहुतिं पृथ
क् देवं विसृज्य स्वहृदि वह्नेर्जिह्वांगमूर्तिभिः
जुहुयात् व्याहृतीर्हुत्वा प्रक्षेत्तस्योक्षिणीजलैः
संप्रार्थ्यानेन मंत्रेणानत्वातं विसृजेद्धृदि भोभो
वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मान्तरे
पिसंप्राप्ते सान्निध्यं कुरु सादरम् वह्नोपवि

हो॰ ८

दैनिक्षिप्यप्रणीतां बुधविद्विधेन् विधिं विस्त
ज्यसकृष्णान् परिधीन्विन्यसेव सो प्रवंहो
मं समाप्याथ तर्पयेद्देवतां जलैः इति मंत्रम
होदध्यनुसारिणी होमपद्धतिः ॥

आवाह्य तदर्पणापोन तर्पणादभिषेचनम्
तर्पयामि नमश्चेति द्वितीयांतेष्ट पूर्वकम्
मूलांतेनतु पदं देयं सिंचामीत्यभिषेचने त
तो नानाविधैरन्नैस्तर्पयेद्विजसत्तमान् इष्ट
रूपान् समाराध्य तेभ्यो दद्याच्च दक्षिणाम्
न्यूनं संपूर्णतामेति ब्राह्मणाराधनात्क्षणा
त् देवताश्च प्रसीदंति संपद्यंते मनोरथा
॥ इति ॥ १९४५ श्रीनगरे लिखा

सं०१८३